# ञ

"ञकारो व्यञ्जनवर्णभेदः अर्द्धमात्राकालेनोच्चार्य्यः तस्योत्पत्तिस्थानं नासिकानुगततालुस्थानम् तस्योच्चारणे जिह्वामध्येन तालुमध्यस्य स्पर्शः आभ्यन्तरप्रयत्नः । संवारनादघोषा अल्पप्राणश्च बाह्यप्रयत्नाः । मातृकान्यासेऽस्य वामहस्ताङ्गुल्यग्रे न्यास्यता । वर्णाभिधानेऽस्य वाचकशब्दा उक्ता यथा

"ञकारो बोधनी विश्वा कुण्डली मखदोर्वियत् । कौमारी नागविज्ञानी सव्याङ्गुलनखो वकः । सर्वेशस्सूर्च्छितो बुद्धिः स्वर्गात्मा घर्घरध्वनिः । धर्मैकपादः सुमुखो विरजा चन्द्रनेश्वरी । गायनः पुष्पधन्वा च वागात्मा च विरञ्चिणी"। एतदधिष्ठातृदेवीध्येयरूपं यथा "चतुर्भुजां धूम्रवर्णां कृष्णाम्बरविभूषिताम् । नानालङ्कारसंयुक्तां जटामुकुटराजिताम्। ईषद्धास्यमुखीं नित्यां वरदां भक्तवत्सलाम्। एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्" वर्णोद्धारतन्त्रम् । अस्य स्वरूपं यथा "सदा ईश्वर संयुक्तं ञकारं शृणु सुन्दरि ! रक्तविद्युल्लताकारं या स्वयं परकुण्डली । पञ्चदेवमयं वर्णं पञ्चप्राणात्मकं सदा। त्रिशक्तिसहितं वर्णं त्रिविन्दुसहितं सदा" कामधेनुतन्त्रम् । तस्य मात्रावृत्ते प्रथमोपन्यासे मरणं फलम् ञशब्दे प्रमाणं द्रष्टव्यम् ।

ञ पु० १ गायने २ घर्घरध्वनौ एकाक्षरको० । ३वृषे ४शुक्रे [५वामभतौ च मेदि० ।

ञकार पु० ञ+स्वरूपे कारप्रत्ययः । ञस्वरूपे वर्णे "ञकारो बोधनी विश्वा" वर्णाभिधानम् ।

इति वाचस्पत्ये ञकारादिशब्दार्थसङ्कलनम् ।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यविरचिते वाचस्पत्ये चवर्गादिशब्दार्थसङ्कलनं समाप्तम् ।

# ट

टकारो व्यञ्जनवर्णभेदः अर्द्धमात्राकालेनोच्चार्य्यः अस्योच्चारणस्थानं मूर्द्धा । अस्योच्चारणे मूर्द्धस्थानेन जिह्वामध्यस्य स्पर्शः आभ्यन्तरप्रयत्नः । विवारश्वासाघोषा बाह्यप्रयत्नाः। मातृकान्यासेऽस्य दक्षिणस्फिचि न्यास्यता वर्णाभिधाने अस्य वाचकशब्दा उक्ता यथा "टकारश्च कपाली च सोमेशः खेचरी ध्वनिः । मुकुन्दो विनदा पृथ्वी वैष्णवी वारुणी नरः। दक्षस्फिगर्द्धचन्द्रश्च जरा भूतिः पुनर्भवः। बृहस्पतिर्धनुश्चित्तः प्रमोदा विमला कटिः। राजगिरिर्महाधनुर्प्राणात्मा सुमुखी मरुत्"। अस्य स्वरूपं यथा "टकारं चञ्चलापाङ्गि! स्वयं परमकुण्डली । कोटिविद्युल्लताकारं पञ्चदेवमयं सदा । पञ्चप्राणयुतं वर्णं गुणत्रयसमन्वितम्। त्रिशक्तिसहितं वर्णं त्रिविन्दुसहितं वरं सदा" कामधेनुतन्त्रम् । एतदधिष्ठातृदेवतारूपं यथा "ध्यानमस्य प्रवक्ष्यामि शृणुष्व वरवर्णिनि ! । मालतीपुष्पवर्णाभां पूर्णचन्द्रनिभेक्षणाम् । दशबाहुसमायुक्तां सर्वालङ्कारसंयुताम्। परमोक्षप्रदां नित्यं सदा स्मेरमुखीं पराम्। एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्" वर्णोद्धारतन्त्रम् । मात्रावृत्तेऽस्य प्रथमोपन्यासे खेदः फलम् । ञशब्दे प्रमाणं द्रष्टव्यम् ।

ट पु० टल–ड । १वामने २पादे ३निःस्वने च मेदि० ।

टक बन्धे चु० उभ० सक० सेट् इदित् । टङ्कयति–ते अटटङ्कत्–त । "टङ्कितेनोऽतिपाटने" काशी० गङ्गास्तवः । "नाकृष्टं न च टङ्कितम् न नमितम् नोत्थापितम् स्थानतः" महाना० । उद् + उल्लेखे । उट्टङ्कितम् ।

टकार पु० ट+स्वरूपे कारप्रत्ययः । टस्वरूपे वर्णे "टकारश्च कपाली च" वर्णाभिधानम् ।

टक्क पु० टकि–बा० कक् पृषो० उपधालोपश्च । देशभेदे ।

टक्कदेशीय पु० टक्कदेशे भवः छ । १वास्तूकशाके त्रिका० । २तद्देशभवमात्रे त्रि० ।

टगण पु० मात्रावृत्ते षाण्मात्रिकप्रस्तावे त्रयोदशभेदात्मके गणभेदे तेषामाकाराधिदेवाश्च छन्दोग्रन्थोक्ता यथा "(ऽऽऽ) १ शिवः ।।ऽऽ शशी २ (।ऽ।ऽ दिनपतिः) ३ (ऽ।।ऽ सुरपतिः) ४ (।।।।ऽ शेषः) ५ (।ऽऽ। अहिः) ६ (ऽ।ऽ। सरोजम्) ७ (।।ऽ। धाता) ८ (ऽऽ।।कलिः) ९